हि पुरुषस्य दोषमावच्यति क्रतोश्चोपरिकरिष्यति" सा॰कौ॰। इति सांख्या मन्यन्ते मीमांसका वेदान्तिनश्च वैधहिंसाया अनर्थहेतुत्वं निराचक्रुः तच्च शा॰सूत्रे तद्भाष्ये च प्रपञ्चेनोक्तम् तत्तु ४४२ पृष्ठे उदाहृतम्।

**अविशेष** पु॰ विशेषोभेदकधर्म्मः अभावे न॰त॰। १भेदकधर्म्माभावे "वायुमब्दादविशेषविशेषाभ्याम्" शा॰सू॰। २अभेदे ऐक्ये च।न॰ब॰।३विशेषशून्ये तुल्ये त्रि॰ सांख्यादिमतसिद्धेषु शान्तत्वघोरत्वमूढत्वरूपविशेषशून्येषु स्थूलभूतोपादानेषु ४सूक्ष्मभूतेषु। तानि च तन्मात्राणि यज्जातीयेषु शान्तादिविशेषत्वयं न तिष्ठति तज्जातीयानां शब्दस्पर्शरूपरसगन्धानामाधारभूतानि सूक्ष्मद्रव्याणि स्थूलानामविशेषाणि। "तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति विष्णुपुराणादिभ्यः। अस्यायमर्थः तेषु तेषु भूतेषु तन्मात्रास्तिष्ठन्तीति कृत्वा धर्म्मस्य भेदाद्द्रव्याणामपि तन्मात्रता स्मृता। ते च पदार्थाः शान्तघोरमूढाख्यैः स्थूलगतशब्दादिविशेषैः शून्या एकरूपत्वात्। तथा च शान्तादिविशेषशून्यशब्दादिमत्त्वमेव भूतानां शब्दादितन्मात्रत्वमित्याशयः। अतोऽविशेषिणोऽविशेषसंज्ञिता इति शान्तं सुखात्मकं, घोरं दुःखात्मकं, मूढं मोहात्मकम्। तन्मात्राणि च देवादिमात्रभोग्यत्वेन केवलं सुखात्मकान्येव सुखाधिक्यादिति" सां॰प्र॰भा॰। तन्मात्राण्यविशेषाः" सां॰का॰ तत्सत्त्वे च प्रमाणं तन्मात्रशब्दे दर्शयिष्यते। नित्ययोगे इनि। अविशेषीत्यपि तन्मात्रे।

**अविशेषज्ञ** त्रि॰ विशेषं न जानाति ज्ञा–क असम॰स॰। विशेषानभिज्ञे भेदकधर्म्मानभिज्ञे।

**अविशेषित** त्रि॰ न विशेषितः भेदकधर्म्मेण।यस्य इतरस्मात् विशेषणेन व्यावृत्तिर्न कृता तस्मिन् पदार्थे। [२अक्लिष्टे च

**अविश्रान्त** त्रि॰वि+श्रम–क्त न॰त॰। १विरामरहिते २सन्तते

**अविश्रम्भनीय** त्रि॰ वि+श्रम्भ–अनीयर् न॰त॰। विश्वासकरणायोग्ये। [सेदविश्वस्ते विश्वस्ते नातिविश्वसेत्" हितो॰।

**अविश्वस्त** त्रि॰ न॰त॰। विश्वासयोग्यताहीने "न विश्व-

**अविश्वास** पु॰ अभावे न॰त॰। १विश्वासाभावे न॰ब॰। २विश्वासानाधारे ३विश्वासायोग्ये पदार्थे च। [कारके।

**अविश्वासिन्** त्रि॰न विश्वसिति णिनि स्त्रियां ङीप्। विश्वासा-

**अविश्लिष्ट** त्रि॰ विरोधे न॰त॰। विश्लिष्टभिन्ने सङ्गते।

**अविष** पु॰अव–टिषच्।१समुद्रे,२नृपे च।टित्त्वात् ङीप्।३नद्यां स्त्री। ४रक्षकमात्रे त्रि॰। नास्ति विषं यत्र।५विषशून्ये त्रि॰। "अपओषधीरविषा वनानि" ऋ॰६,३९,५, "अविषा विषरहिता निरस्तकाणि वा वनानि" भा॰। विश्वायाम् अतिविषयाम् (आतइच्) स्त्री टाप्।

**अविषक्त** त्रि॰न॰त॰। असंलग्ने।

**अविषम** त्रि॰ विरोधे न॰त॰। १विषमभिन्ने समे (जोड़) २समपदे ३सुगमे च। [२विषयशून्ये त्रि॰।

**अविषय** पु॰ न॰त॰। १अगोचरे २अप्रतिपाद्ये। न॰ब॰।

**अविषह्य** त्रि॰न विशेषेण सह्यः न॰त॰।१सोढुमशक्ये २इतरैर नभिभवनीये "अविषह्यविक्रमः, ३परिच्छेत्तुमशक्ये च "सीमायामविषह्यायाम् स्वयं राजैव धर्मवित्" मनुः।

**अविष्टम्भ** पु॰ अभावे न॰त॰। १आलम्बाभावे। न॰ब॰। २आलम्बनशून्ये त्रि॰।

**अविष्ठ** त्रि॰ अतिशयेन अविता अवितृ+इष्ठन् तृणोलोपः। अतिशयेन रक्षके। "यो अर्च्चतो ब्रह्मकृतिमविष्ठः" ऋ॰७।२८।५ "अविष्ठः अतिशयेन रक्षिता" भा॰।

**अविष्या** स्त्री अव–गतौ इसुन् अविर्गतिमिच्छति क्यच्–भावे अ। गमनेच्छायाम्। "अविष्यामनुव्रतं सवितुः" ऋ॰२,३८,३, "अविष्यां गमनेच्छाम्" भा॰।

**अविस्** न॰ अव–भावे इसुन्। १रक्षणे २गतौ च।

**अविसंवाद** पु॰ विसंवादः प्रमाणानुसरणाभावः विरोधे न॰त॰। १प्रमाणानुसरणे २याथार्थ्यविषयकत्वे।

**अविसंवादिन्** त्रि॰ विरोधे न॰त॰। प्रमाणान्तरानुसारिणि १यथार्थविषयके २सफले पदार्थे च।

**अविसोढ** न॰ अवेर्दुग्धम् अवि+सोढच् न सत्वम्। १मेषीदुग्धे। न विसोढः। २असोढे त्रि॰।

**अविस्थल** न॰ भारतोक्ते ग्रामभेदे। "अविस्थलं वृकस्थलं माकन्दीं वारणावतम्। अवसानञ्च गोविन्द! कञ्चिदेकञ्च पञ्चमम्" भा॰उ॰प॰।

**अविस्पष्ट** न॰ विस्पष्टं श्रुतमात्रेणार्थाविबोधकं सुखेन अववाणायोग्यञ्च। वि+स्पश–क्त न॰त॰। अस्पष्टवाक्ये।

**अविस्मरण** न॰ अभावे न॰त॰। १विस्मरणाभावे स्मरणे विस्मरणञ्चानुभूतपदार्थस्य कालरोगादि प्रयोज्यः स्मरणाभावः सच अनुभूतविषयेषूद्भूतसंस्कारस्यापि प्रणिधानादिकारणान्तराभावात् अनुद्बुद्धतया स्मृतिरूपकार्य्याजनने, रोगादिना नाशने च भवति। तदभावः अविस्मरणं तत्र च प्रणिधानादिसहकृतसंस्कारस्य स्मरणजनकता रोगाद्यनभिभवनीयता च। यथाह गौ॰सू॰। "प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्युगपदस्मरणम्"। "प्रणिधानं चित्तै-